CC0. In Public Domain, Digitizagtion by eGangotri

Gitagovimda Tika

ORLS

Sanskrit / ~~Sharada~~ Devanagari

Folios - 68.

32 x 17.5 cms.

No 118

गीतगोविन्दम्

No 118

(6341)

RESEARCH LIBRARY
342

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ॐ श्रीगणेशाय नमः भद्राय भवतां भूयात्कृष्णः सद्भक्तिभावितः कालिंदीजलसंसर्गीमेघ-
श्यामोतिसुंदरः १ इह कविः प्रारीप्सितस्य ग्रंथस्य निर्विघ्नपरिसमाप्त्यर्थं श्रीकृष्णस्मरणरूपं
मंगलं निर्दिशन् तत्र मंगलाचरणं तावदाचरति मेघैरिति राधामाधवयोः रहःकेलयो यमुनाकू-
ले जयंतीत्यन्वयः राधामाधवयोः रहःकेलयः एकांतक्रीडा यमुनाकूले यमुनातीरे जयंति सर्वो-
त्कर्षेण वर्तंते कीदृशयोः राधामाधवयोः प्रत्यध्वकुंजद्रुमं अध्वनि मार्गे कुंजे लतागृहे द्रुमे वृक्षे

ॐ मेघैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय इत्थं नंदनिदेशतश्चलितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयंति यमुनाकूले रहःकेलयः १ ॥ श्रीराधाकृ-

ष्णे च कृष्णमिति नंदनिदेशतः नंदाज्ञया चलितयोः प्रस्थितयोः प्रत्यध्वकुंजद्रुमं प्रतिद्रुमं च च-
लितयोः इति किं हे राधे अंबरं आकाशं मेघैर्मेदुरं व्याप्तमित्यर्थः सांद्रः स्निग्धस्तु मेदुर इति कोशः वनभु-
वः तमालद्रुमैः तापिच्छपादपैः श्यामाः अतएव अयं कृष्णः नक्तं रात्रौ भीरुः भयशीलः अतिबालत्वा-
त् तत्तस्मात्त्वमेव इमं पुरावर्तिनं कृष्णं गृहं प्रापय इदानीं कविः सरस्वतीलक्ष्म्योः कीर्तनपूर्वकं कृष्ण-

वाग्देवताचरितेति जयदेवकविः एतं प्रबंधं कृष्णकेलिकथाप्रतिपादकं ग्रंथं करोतीत्यन्वयः कीदृ-
शः कविः वाग्देवतायाः सरस्वत्याः चरितेन वचनरचनाविशेषेण चित्रितं मंडितं चित्तसद्म मनोमंदिरं यस्य
स तथा पुनः कीदृशः पद्मावत्याः लक्ष्म्याः चरणयोः चारणे सेवा तेन चक्रवर्ती नृपइव लक्ष्मीसेवी
इति चक्रवर्तिनेश्राम्यइति कीदृशं प्रबंधं श्रीरूपा राधा वासुदेवः कृष्णः तयोः रतिकेलिकथया समेत-

वाग्देवताचरितचित्रितचित्तसद्मा पद्मावतीचरणचारणचक्रवर्ती श्री-
वासुदेवरतिकेलिकथासमेतमेतं करोति जयदेवकविः प्रबंधं २
यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलं मधुरको-
मलकांतपदावलीं शृणु तदा जयदेवसरस्वतीम् ३ ॥ श्री ॥

श्रीकृष्णकथनेन युक्तं २ हे कृष्णभक्त तदा जयदेवसरस्वतीं शृणु यदा हरिस्मरणे कृष्णचिंतने सर-
सं सानुरागं तव मनो लोलुप्यमानं यदि विलासः कृष्णविलासः कलासु चतुःषष्टिः तासु कुतू-
हलं अस्तीति कीदृशीं जयदेवसरस्वतीं मधुरां सरसां अर्थतः कोमलां शब्दतः अतएव कांतां मनो-
हरां पदावलिः पदसमूहो यस्याः सा तां कविरन्यग्रंथेभ्यो मद्ग्रंथे बहवो गुणाः संतीति द्योतयन्नाह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी॰
गो॰
टी॰
२

उमापतिधरः कविर्वाचः वचनानि पल्लवयति विस्तारयति नतु गुणाधिकां गिरां संदर्भशुद्धिं ग्रथितः शब्दस्तस्य ग्रंथनविशुद्धिं जयदेव एव परं जानीते नान्यः स्पष्टः शरणकविः दुरूहद्रुतेः विषमस्य ग्रंथस्य शीघ्रोच्चारणात् श्लाघ्यः स्तुत्यः शृंगारोत्तराणि शृंगारप्रधानानि संति उत्कृष्टानि प्रमेयानि वाक्यानि तेषां रचनैः प्रबंधैराचार्यगोवर्धनः स्पर्धी कोपि न विश्रुत आचार्यगोवर्धनः शृंगारप्रधानमेव प्रबंधं करोति

वाचः पल्लवयत्युमापतिधरः संदर्भशुद्धिं गिरां जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः शृंगारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धनः स्पर्धी कोपि न विश्रुतः श्रुतिधरो धोयी कविः क्ष्मापतिः ४ कनकरुचिरचौले वल्लवीकेलिलोले कलितजलधिकोलप्रयुनेशादेहे प्रशमितशिशुपाले कंसचाणूरकाले स्खलितवनमाले नौमि कंसारिमेलं ६

तथा धोयीनामाकविः क्ष्मापतिः कविराजः श्रुतिधरः श्रुत्वा श्रवणमात्रेणैव धारयतिनपुनः र्ग्रंथोपग्रहणे प्रवीणाः इति राजपदेन महाहंकारकथनं अथ नामभक्तानुग्रहार्थं विघ्नाभावार्थं च दशावतारवर्णनमाह ५ ॥ ५ ॥ ॥ श्रीराधाकृष्णाभ्यां नमः ॥ ॥ ॥ ॥ २

प्रलयइत्यादि अस्य गीतस्य मालवरागः गीतस्य लक्षणं नित्यं विनीतो दितिपन्नकपक्षः शुकद्युतिः कोस्तुभवान्प्रमत्तः संकेतशालां प्रविशन्प्रदोषे मालाधरो मालवरागराजः १ मालवरागे ध्रुवपदं हे केशव धृतमीनशरीर केशवो धारणार्थेन हे जगदीश हरे जय उत्कर्षेण वर्तस्व कस्मादित्यत आह हे प्रलयपयोधिजले कल्पांतसमुद्र

मालवरागे प्रलयपयोधिजले धृतवानसि वेदं विहितवहित्रचरित्रमखेदं केशव धृतमीनशरीर जय जगदीश हरे १ क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे धरणिधरणकिणचक्रगरिष्ठे केशव धृतकच्छपरूप जय जगदीश हरे ॥ २ ॥

जले वेदं धृतवानसि धारयसि कथमखेदं श्रमपरिश्रमं यथा पुनः कथं यथा स्यात्तथा विहितं कृतं वहित्रचरित्रं नौकाचरित्रं येन कारणेन नौका वेष्टितं यत्र क्रियायां १ हे केशव धृतं कच्छपरूपं येन हे जगदीश हे हरे तव पृष्ठे क्षितिः पृथ्वी तिष्ठति मन्वयः कीदृशे पृष्ठे अतिविपुलतरे अतिक्रांतः विपुलतरः यस्मात् येन पुनः कीदृशे धरणि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सदा धारणेन वहनेन यत्किरणचक्रमण्डलकपिंडः तेन गरिष्ठे हरे २ हे धृतसूकररूप धृतं शूकररूपं येन तव
दशनशिखरे दंताग्रभागे धरणी पृथ्वी लग्ना संबद्धा तत्र दृष्टांतः काइव शशिनि कलंके रेखाइव ३ धृतं नर
हरिरूपं नरसिंहरूपं येन तस्य संबोधने हे नवकरकमलवरे करपद्मश्रेष्ठे नखमस्तीत्यध्याहारः कीदृशं नख

वसति दशनशिखरे धरणी तव लग्ना शशिनि कलंककलेव निमग्ना ।
केशव धृतशूकररूप जय जगदीश हरे ३ तव करकमलवरे नखमद्भुत
शृंगं दलितहिरण्यकशिपुतनुभृंगं केशव धृतनरहरिरूप जय जग
दीश हरे ४ छलयसि विक्रमणे बलिमद्भुतवामन पदनखनीरजनि ।
तजनपावन केशव धृतवामनरूप जय जगदीश हरे ५ ॥ राधाकृ०

मद्भुतशृंगं अद्भुतमाश्चर्यकारकं शृंगमग्रभागो यस्य तत् अद्भुतनखेनैतमाह दलितः विदारितः हिर
ण्यकशिपोर्दैत्यस्य तनुरेव भृंगो भ्रमरो येन अन्यत्र तु भ्रमरेण कमलं दल्यते इह तु वैपरीत्येनाश्चर्यं ४ धृतं
वामनरूपं येन हे अद्भुतवामन आश्चर्यहेतुवामन त्वं विक्रमणे पादविक्षेपकर्मणे बलिमसुरं छलयसि

पदनखनीरजनितजनपावनं पदनखनीरेणोत्पन्नं जनपावनं येन ॥५॥

३

धृतं परशुरामरूपं येन क्षत्रियरुधिरमये पयसि जगत् स्नपयसीत्यन्वयः क्षत्रियशोणितविकारे जले जग
त्स्नपयसि स्नाने फलमाह कीदृशं जगत् अपगतपापं गतकलुषं पुनः कीदृशं शमितः शांतः संसारतापो य
स्य तत् ६ धृतं रामशरीरं येन त्वं रणे संग्रामे दशमुखमौलिबलिं रावणमस्तकोपहारं दिक्षु दिशासु

क्षत्रियरुधिरमये जगदपगतपापं स्नपयसि पयसि शमितभवतापं
केशव धृतभृगुपतिरूप जय जगदीश हरे ६ वितरसि दिक्षु रणे दिक्प
तिकमनीयं दशमुखमौलिबलिं रमणीयं केशव धृतरामशरीर ज
य जगदीश हरे ७ वहसि वपुषि विशदे वसनं जलदाभं हलहतिभी ।
तिमिलितयमुनाभं केशव धृतहलधररूप जय जगदीश हरे ८ ॥

वितरसि ददासि कीदृशं दिक्पतिकमनीयं इंद्रादीनां काम्यमिच्छाविषयमित्यर्थः रमणीयं मनोहरं
दशास्यस्य शिरोदानात् ७ धृतं हलधररूपं बलभद्ररूपं येन हे वपुषि वसनं वस्त्रं वहसि धारयसि ।
कीदृशे वपुषि विशदे स्वच्छे कीदृशं वसनं जलमेघसदृशं पुनः कीदृशं हलहतिभीत्यालंभमलावान

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भयेन मिलिता उपस्थिता या यमुना तद्वदाभाति प्रियं स्वेतिभयेनातिसाम्यं भवति ८ हे धृतबुद्धावतार
हे दयासहित नः करुणा अहह इति खेदे दयया वा न्ययत्त विधेः क्रतुविधानस्य श्रुतिजातं वेदसमूहं
निन्दसि हृष्यसि कीदृशं श्रुतिजातं दर्शितः प्रतिपादितः पशूनां घातो वधो यत्र ९ हे धृतकल्काव

निन्दसि यज्ञविधेरहह श्रुतिजातं सदयहृदयदर्शितपशुघातं केशव
धृतबुद्धशरीर जय जगदीश हरे ९ म्लेच्छनिवहनिधने कलयसि कर
वालं धूमकेतुमिव किमपि करालं केशव धृतकल्किशरीर जय जग
दीश हरे १० श्रीजयदेवकवेरिदमुदितमुदारं शृणु सुखदं शुभदं भ
वसारं केशव धृतदशविधरूप जय जगदीश हरे ॥११॥ श्रीगोपाल॰

तार त्वं म्लेच्छनिवहनिधने म्लेच्छसमूहनिमित्तं किमपि अनिर्वचनीयं करवालं खड्गं कलयसि धारय
सि कीदृशं करवालं धूमकेतुमिव औत्पातिकतारकापातमिव करालं भयानकं यद्वा धूम ६
केतुमग्निमिव १० धृतदशविधरूप दशप्रकारशरीर श्रीजयदेवकवेः इदं गीतमुदितमा

विर्भूतं शृणु आकर्णय हे भक्तजन भवतु किं कीदृशं मधुरं मनोहरं सारं स्वसारं [illegible] शुभदं क
ल्याणदायकं भवसारं संसारे धनरूपं अज्ञानेनावतारान्पुनः संक्षेपेण कीर्तयति ११ वेदानिति
तुभ्यं कृष्णाय नमोऽस्त्वन्वयः स्पष्टः कविरिदानीं भैरवीरागेण [illegible] स्मरतीति रागलक्षणं यथा मा

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते दैत्यं दारयते बलिं छल
यते क्षत्रक्षयं कुर्वते पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः १२ श्रितकमला
कुचमण्डल धृतकुण्डल ए कलितललितवनमाल जय जय देव हरे १

केशीमलयमुखाणां मल्लसमूहानां [illegible] स्वराणां रचनाविभागं तेन मालवरागेण गी
यते १२ श्रितेति हे देव हे हरे त्वं जय जय सर्वान् [illegible] श्रितेत्यादीनि सम्बोधनपदानि सर्वो
पमानि तान्यानि पदानि परं [illegible] श्रिते आश्रिते कमलायाः लक्ष्म्याः कुचमण्डले स्तनमण्डले ये

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न कौलितालानालिताकुंदीवनमालापुष्पदामयेन १३ हे सूर्यमंडलालंकारभूत हे भक्तानां संसारखं-
गी० डक हे मुनिजनमानसहंस मानसे पद्महंसोसि जयजयेति पूर्ववत् १४ हे कालियनाम्नः सर्पस्य गं-
गो० जनकहंसक जनरंजन भक्तरंजक यदुकुले यादवकुले कमलसूर्य १५ मधुमुरनरकसंज्ञकानां दै-
टी०
५

दिनमणिमंडलमंडन भवखंडन ए मुनिजनमानसहंस जयजय० १४
कालियविषधरगंजन जनरंजन ए यदुकुलनलिनदिनेश जय० १५
मधुमुरनरकविनाशन गरुडासन ए सुरकुलकेलिनिदान जय० १६
अमलकमलदललोचन भवमोचन ए त्रिभुवनभवननिधान जय० १७

त्यानां नाशन गरुडवाहन यस्य सुरकुलानां देवसमूहानां केलेः क्रीडायाः सुखस्येति यावत्
निदानमादिकारणं १६ अमलकमलदलवत् निर्मलपद्मपत्रवत् लोचने यस्य भवमोचन सं-
सारमोचक त्रिभुवनमेव भवनं गृहं तत्र निधानमिति निधिरिव १७ ॥ ॥ श्रीगोपाल०

जनकसुतायाः सीतायाः कृतं भूषणं कृतालंकार जितो दूषणनामा राक्षसो येन जितपापवा
समरे संग्रामे शमितो मारितो दशकंठो येन १८ हे नूतनमेघवत्सुंदर धृतमंदराचल श्रीमुखचं-
द्रस्य चन्द्रस्य चकोर इव १९ हे हरे तव चरणे वयं प्रणताः स्म इति भावय जानीहि प्रणते-

जनकसुताकृतभूषण जितदूषण ए समरशमितदशकंठ जय० १८
अभिनवजलधरसुंदर धृतमंदर ए श्रीमुखचंद्रचकोर जय० १९
तव चरणे प्रणता वयमिति भावय ए कुरु कुशलं प्रणतेषु जय श्रीज-
यदेवकवेरिदं कुरुते मुदं मंगलमुज्ज्वलगीति जय० २० ॥ राम ॥

षु नम्रेषु कुशलं कुरु २० हे देव हे हरे त्वं जय जयेति प्रार्थ्यते श्रीजयदेवकवेरिदं उदितं मंगलं
गीतविशेषः मुदं हर्षं कुरुते भक्तानामिति शेषः कीदृशं मंगलं उज्ज्वलं गीति गानं यस्मिन् शृंगा-
रनायकविः कामोद्दीपकत्वाद् शृंगाररसवर्णनव्याजेन श्रीकृष्णक्रीडावर्णनं भक्ताच्याख्याविधं श्रूते २०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी०
गो०
टी०
६

पद्मेति पद्मायास्तस्याः पयोधरतटीस्तनयोस्तस्य परिरंभणेनालिंगनेन लग्नं यत्काश्मीरं कुंकुमं केसरं तेन मुद्रितं चिह्नितं मधुसूदनस्य उरः वक्षःस्थलं तेनान्यसेति भावः पुनः कीदृशं व्यक्तानुरागमिव पुनः

पद्मापयोधरतटीपरिरंभलग्नकाश्मीरमुद्रि
तमुरो मधुसूदनस्य व्यक्तानुरागमिवखे
लदनंगखेदस्वेदांबुपूरमनुपूरयतुप्रियंवः
॥ २१ ॥

कीदृशमुरः खेलन्खेलगतिं कुर्वन् यः अनंगः कंदर्पः तस्य खेदेन स्वरतायासेन स्वेदांबुपूरो
यस्मिन् तल्पवाहोयत्र अधुना विरहोत्कंठितायाः काचित्सखी कृष्णवार्तां वक्तुमाह २१ ॥ ६

वसंतेति वसंतकाले काचित्सहचरी सखी सरसं सलीलं वचनमाणमिदं राधांप्रत्यूचे अवदत्
कीदृशीं राधां कांतारे दुर्गमे वने निभ्रमंतीं पुनः कीदृशीं बहुविहितेवारंवारंकृतोहरेणकृष्णेनं
ध्यानं संधानेयया पुनः कीदृशीं अमंदमत्यंतं व्यथासातथा कंदर्पज्वरेण कामसंतापेन जनिताचा

वसंतेवासंतीकुसुमसुकुमारैरवयवैर्भ्रमंतींकांता
रेबहुविहितकृष्णानुसरणां अमंदंकंदर्पज्वरजनि
तचिंताकुलतया चलद्बाधांराधांसरसमिदमूचेसह

सौचित्यस्याकुलताचलद्बाधा चलंती अंकुरंती बाधा पीडा यस्याः सर्वांगमयं गीतेनाहचलितेति प्
नस्य वसंतरागः रागलक्षणं शिखंडबर्हांचितवेणुः प्रच्यातिके वनलतां करेणाभ्रमन्मृदावा
समनंगमूर्तिर्मनोमनंगस्य वसंतरागः ॥ २२ ॥ ॥ गोपालायनमः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री० श्री० श्री० ८

ध्रुवपदं हे सखि हरिः सरसवसन्ते विहरति युवतिजनेन समं नृत्यति चेति ध्रुवगतपदेनान्वयः हे रा
धे हरिः हसन् सरस मनोहरवसन्ते क्रीडति कामिनीसमूहेन सह नर्तनं करोति च कथंभूते वसन्ते विरहि
जनानां स्मरपीडया दुरन्ते दारुणे विरहिपदेनान्वयः कीदृशे वसन्तसमये ललितलवङ्गलतायाः

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे मधुकरनि
करकरम्बितकोकिलकूजितकुञ्जकुटीरे विहरति हरिरिह सरस
वसन्ते नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते २३॥

ध्रुवपदं॥

लवङ्गलतायाः लवङ्गवल्ल्याः परिशीलनेन संपर्केण कोमलो मनोहरो मलयसमीरो मलयवा
निलो यत्र अनेन वायोः सौगन्ध्यं शैत्यं मान्द्यं चोक्तं मधुकरैर्मधुकरनिकरैर्भ्रमरसमूहेन करम्बि ८
तः कोकिलैः मिश्रितः कूजितः शब्दितः कुञ्जपल्लवलतागृहमेव कुटीरो यत्र २३॥ श्री॥

उन्मदो मदनो येषां ते उन्मदमदनाः तेषां मनोरथो यस्याः पथिकवधूजनः पान्थस्त्रीजनस्तेन
जनितः उत्पादितो विलापः परिदेवनं यत्र अलिकुलेति अलिकुलैर्भ्रमरसमूहैः संकुलो व्याप्तः कु
सुमसमूहो येन निराकुलो व्यग्रः बकुलानां वृक्षाणां कलापः समूहो यत्र २४ मृगमदसौरभ

उन्मदमदनमनोरथपथिकवधूजनजनितविलापे अलिकुला
संकुलकुसुमसमूहनिराकुलबकुलकलापे विहरति॰ २४ मृग
मदसौरभरभसवशंवदनवदलमालतमाले युवजनहृदयविदार
णमनसिजनखरुचिकिंशुकजाले विहरति॰ २५॥ राम॥

कस्तूरिकायाः सौरभरभसवशंवदानवानूतनानां दलमालायेषांते ईदृशास्तमालायत्र नूतनपत्रतमा
लोद्गमसंभवं करोतीति युवजनानां तरुणजनानां हृदयं विदारयति एवंविधो यो मन
सिजः कंदर्पः तस्य यानि नखानि तद्रुचिरो रुचिर्येषां एवंभूतानां किंशुकानां पलाशपुष्पाणां

मातंगसद्योजय २५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मदनमहीपतेः कामनृपस्य कनकदंडे स्वर्णदंडवद्रुचिर्यस्य केसरः। केसरकुसुमविकाशो नागकेसरपुष्पविकाशो प्रादुर्भावो यत्र मिलिताः शिलीमुखाः भ्रमरा येषु तैः पाटलपटलैः पाटलापुष्पसमूहैः कृतः स्मरतूणविलासः कामतूणीरचेष्टितं यत्र ४ विगलितस्त्यक्तो लज्जितस्य जगतः

मदनमहीपतिकनकदंडरुचिकेसरकुसुमविकाशे मिलितशिली
मुखपाटलपटलकृतस्मरतूणविलासे विहरतिहरिः ४ विगलितल
ज्जितजगदवलोकनतरुणकरुणकृतहासे विरहिनिकृंतनकुंत
मुखाकृतिकेतकिदंतुरिताशे विहरति ५ ॥ श्रीराधाहरिः ॥

अवलोकनेनदर्शनेनतरुणकरुणैः तरुणकरुणावृक्षैः पुष्पविकाशव्याजेनकृतोहासोयत्र वि
रहिनिकृंतना निर्वियोगिमारकानिकुंतमुखाकृतीनिभल्लमुखाकाराणियानिकेतकीपुष्पाणि ८
तैः दंतुरिताव्याप्ताआशादिशोयत्र ५॥ ॥ ॥ ॥ ॥

माधविकायावासंतीलतायाः परिमलेनगंधेन ललितेमनोहरे नवमालिकानिवनपुष्पाणिजातिः
जातिपुष्पाणितास्यांसुगंधौ मुनिमनसामपिऋषिचित्तानामपिमोहनकारिणिमदजनके तरु
णानांयूनांअकारणबंधौसहजमित्रे वृंदावनविपिनेहरिःक्रीडतीत्यन्वयः ६ स्फुरत्यास्फुलना

माधविकापरिमलललितेनवमालिकजातिसुगंधौ मुनिमन
सामपिमोहनकारिणितरुणाकारणबंधौ ६ स्फुरदतिमुक्त
लतापरिरंभणमुकुलितपुलकितचूते वृंदावनविपिनेपरिसा
रपरिगतयमुनाजलपूते ७ ॥

इतिमुक्तलतायाः परिरंभणेनालिंगनेनमुकुलितः पुष्पितः पुलकितोहृष्टः आम्रवृक्षोकी
दृशे वृंदावनविपिनेपरिसरेपर्यंतभूमौपरिगतंव्याप्तंयत् यमुनाजलंतेनपवित्रेपूते ७ ॥ ८
श्रीजयदेवकवेरिदंभणितंउदयति उदयंप्राप्नोतीत्यर्थः हरिचरणस्मृतिरचितनेसारोम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवंविधं सरससमनोहरं वसंतसमयवर्णनेयत्र अनुगतमदनविकारः कामविलासो यत्र वि
योगिनां तु सह वसंतवाते वर्णयतिरेति ८ इह वसंते गंधवाहो वायुः चेतः मनांसि हृदि दहतीम
त्वयः किंभूतेन दरविदलितायाः ईषद्विकसितायाम् मल्यमल्लिकायाः वलिपुलतावेंच रेंडूरवा।

श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारं सरसवसंतस
मयवनवर्णनमनुगतमदनविकारं विहरति॰ ८ दरविदलितम
ल्लीवल्लिचंचत्परागैः प्रकटितपटवासैर्वासयन्काननानि इह हि द
हति चेतः केतकीगंधबंधुः प्रसरदसमबाणप्राणवद्गंधवाहः १॥

गच्छद्भिः परागैः पुष्परजोभिः प्रकटितपटवासैः स्फुटीकृतपटवासचूर्णैः काननानि वनानि वासय
न्सुरभीकुर्वन् पुनः कीदृशः केतकीपुष्पाणां गंधस्य बंधुः मित्रं प्रसरंतो ये असमबाणाः तेषां प्रा
णवत्प्राणा इव वसंतवासरगणा अनंगोद्दीपकत्वमाह १॥ श्रीराधाकृष्णाय नमः ॥ ५ ५

उन्मीलदिति अमी वसंतसंबंधिनो वासराः दिवसाः पथिकैर्मार्गस्थैः विरहिभिः कथं कथमपि नी
यंते केनापि प्रकारेणातिवाह्यंते कीदृशाः वासराः उन्मीलन्प्रकाशमानो यो मधुगंधः पुष्परसगंधस्तेन लुब्धा
ये मधुपा भ्रमरास्तैर्व्याधूताः कंपिता ये चूतांकुराः तेषु क्रीडंतः कोकिलास्तेषां काकलीकलकलैः सूक्ष्मा
व्यक्तमधुरध्वनिकोलाहलैः कष्टजनकत्वेन उद्गीर्णाः प्रकाशिताः कर्णज्वराः श्रवणपतापा येषु कं

उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुर क्रीडत्कोकिलकाक
लीकलकलैरुद्गीर्णकर्णज्वराः नीयंते पथिकैः कथं कथमपि ध्या
नावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः २
अनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसं मुरारिमा

थंनीयंत इत्यत आह ध्यानेति ध्यानेवधानेन प्रवृत्ताये क्षिणे कार्ये तेन लब्धा अल्पकाले प्राणसमायाः प्राणवल्ल
भायाः प्राणसमायाः नायिकायाः समागमरसेन संवंधसुखरसेन उल्लासो हर्षो येषां ते २ अनेकासखी
पुनराहेत्यन्वयः कीदृशास्तीत्याह हे वर्तमाने समंतस्थपार्श्वात पार्श्वस्थस्य पदयोः पंतीविषयका
रयंतीकीदृशं हरिं अनेकनारीपरिरंभसंभ्रमेणालिंगनादरेण स्फुरन्निःसरन् गच्छन् मनोहारी मनो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी॰
गो॰
टी॰
१०

शोयोविलासः क्रीडा ततोलालसः ग्राम्यवान् श्रममेवश्लोकमर्थमाह ३ चंदनेति रामकलीरागः रागलक्षणं सर्णप्रभाभासरभूषणाचनीलेनिचोलंसततौवदंती कांतांपदोपात्तमोपिश्रुतेपिमा नोन्नतारामकलीप्रदिष्टा १ अथपदं हेविलासिनिराधेहरिमुग्धवधूनिकरे मनोहरकामिनीसमू

राडुपरस्थापं त्यक्तौसात्वोसमक्षेप्ननराहराधिकां ३ रामकलीरागः रा
गलक्षणं भ्रुवपदं हरिरिहमुग्धवधूनिकरेविलासिनिविलसति
केलिपरे १ चंदनचर्चितनीलकलेवरपीतवसनवनमाली के-
लिचलन्मणिकुंडलमंडितगंडयुगस्मितशाली १॥ राम ॥

हेहरिर्विलसति क्रीडति कीदृशोवधूनिकरेकेलिपरे क्रीडासक्ते कीदृशोहरिः चंदनेनमलयजेन चर्चितेरेखाकारेणलांछितनीलकलेवरशरीरंयस्यनीलवर्णं वसनेपीतंचवनमालायस्या- सौतिनतः प्रत्येकं कर्मसारयः पुनः कीदृशः केलिनाक्रीडयाचलंतौयेकुंडलेमणिप्रकृतेतावभ्यां-

नवकिशोरीनारीकुचसंयोगपूर्वकं स्मितमधुरविलासलोलनयनांचलशोभितः
कवलितः ॥

हेराधेकाचित् गोपवधूःगोपांगनापीनपयोधरभारभरेणविपुलकुचगौरवातिशयेनसरागंसानुरागं यथास्यात्तथाहरिंपरिरभ्यालिंग्यभूरिचितपंचमरागंऊर्ध्वनीतंपंचमरागंकोकिलस्वरंप्रत्यनुगायति २ कापि- काचिन्मुग्धवधूःबैतस्मेगोपांगनाश्रीभिःकमनीयतयेनमधुसूदनवदनसरोजेश्रीकृष्णमुखारविंदध्याय

पीनपयोधरभारभरेणहरिंपरिरभ्यसरागं गोपवधूरनुगायति १-
काचिदुदंचितपंचमरागं २ कापिविलासविलोलविलोचनखेल
नजनितमनोजं ध्यायतिमुग्धवधूरधिकंमधुसूदनवदनसरो
जं ३ कापिकपोलतलेमिलितालपितुंकिमपिश्रुतिमूले चारु-
चुचुंबनितंबवतीदयितंपुलकैरनुकूले ४ ॥ राम ॥ राम-

तिचिंतयति विलासेनविलोलेनविलोचनयोःखेलनेनसंचारेणजनितउत्पादितोमनोजःकामोयेन ३॥ कापिनितंबवतीगोपांगनाहरिंपिंतलसंकपोलतलेगंडदेशेचारुमनोज्ञंयथास्यात्तथाचुचुंबनितंबवती कीदृशी किमपिकार्यंलपितुंवक्तुंश्रुतिमूलेकर्णप्रदेशेमिलितासंलग्ना कीदृशेकपोलमंडले पुलके

हेरिविरिचितः १

मविरिंकोमितंउद्युगस्य स्मितेनेषद्धासेनशोभतेयःसः
कंचनरागः २॥
१०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी० गो० टी० ११

रोमोद्गमैः प्रनकूलेऽप्रियकथके ४ काचिद्गोपी केलिकला कुतुकेन हेलया करेण दुकूले वस्त्रे श्रीकृ
ष्णं अकूलेऽपकृष्टवती विचकर्ष आकृष्टवती कीदृशं अमुं यमुनावनकूले यमुनातटोपवने किंभूते मं
जीरमंजुलो मनोहरो यो वंजुलकुंजो वेतसलतागृहं तत्र गतं वर्तमानं ५ काचिद्युवतिः गोपांगना
हरिणा प्रशशंसे स्तुता रासरसे गोपक्री

केलिकलाकुतुकेन च काचिदमुं यमुनावनकूले मंजुलवंजुल
कुंजगतं विचकर्ष करेण दुकूले ५ करतलतालतरलवलयावलि
कलितकलस्वनवंशे रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशं
से ६ श्लिष्यति कामपि चुंबति कामपि कामपि रमयति रामां
पश्यति सस्मितचारुपरामपरामनुगच्छति वामां ७॥ ॥ ११

डानुरागे सहनृत्यपरा समकालं नृत्यंती कीदृशे रासरसे करतलयोर्हस्तयोस्तालेन च पेरखनिता
नतरलया चंचलया वलयावल्या कंकणपंक्त्या कलितो मिश्रितः कलस्वरो वंशो यत्र कमधुरशब्द
सहितो वंशो वेणुर्यत्र ६ हरिः श्रीकृष्णः कामपि गोपीं श्लिष्यति आलिंगति तथा कामपि चुं

७

परां नायिकां सस्मितचारु सहास्यमनोहरं यथा स्यात्तथा पश्यति अपरां वामां सुंदरीमनुगच्छतीत्यर्थः
श्रीजयदेवकवेरिदं गीतं शुभानि कल्याणानि वितनोतु वर्धयतु यशस्यं कीदृशं गीतं अद्भुत
माश्चर्यकारकं केशवस्य कृष्णस्य केलिरहस्यं क्रीडारहस्यं यत्र अद्भुतं युगपत्सर्वासां रमणाय स्वा
वृंदावनविपिने वृंदावनाख्ये वने ललितं नानारसान्वितमित्यर्थः ८ इदानीं रागोपमभावसंबंधेन श्री

श्रीजयदेवकवेरिदमद्भुतकेशवकेलिरहस्यं वृंदावनविपिने ल
लितं वितनोतु शुभानि यशस्यं ८ विश्वेषामनुरंजनेन जनयन्नानं
दमिंदीवरश्रेणीश्यामलकोमलैरुपनयन्नंगैरनंगोत्सवं स्वच्छंदं
व्रजसुंदरीभिरभितः प्रत्यंगमालिंगितः शृंगारः सखि मूर्तिमानिव

मनोहरो हरिः कृष्णः क्रीडति कीदृशः मूर्तिमान् शरीरधारी शृंगाररस इव किं कुर्वन् अनुरंजनेनानुरागेण वि
श्वेषां सर्वेषां भक्तानामानंदं जनयन्नुत्पादयन् पुनः किं कुर्वन् इंदीवरश्रेणी नीलोत्पलमाला तद्व
च्छ्यामलकोमलैः कुसुममनोहरैरंगैः अवयवैरनंगोत्सवं कामहर्षमुपनयन्नुत्पादयन् पुनः कीदृशः
स्वच्छंदं स्वेच्छया व्रजसुंदरीभिः गोपांगनाभिः अभितः सर्वतोभावेन प्रत्यंगं प्रत्यवयवमालिंगि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी० तः गोपीभिरेवमालिंगनेषु यदंगे यामंतयानदेवालिंगितमितिभावः शृंगारविशेषणान्यप्येतानि
गो० पदानि मलयानिलस्य उत्सव हेतुकारणमाह अद्योत्संगेति ॥ हेरामेऽद्येदानीं वसंतसमये श्रीखं
टी० डशैलानिलः मलयजपवनः उत्संगे क्रोडे वसंतोयेभुजंगाः सर्पाः तेषां कवलक्लेशादिवग्रा
१२ सोपतापादिवईशाचलं हिमाचलं प्रालेयप्लवनेच्छया

अद्योत्संगवसद्भुजंगकवलक्लेशादिवेशाचलं प्रालेयप्लव
नेच्छयानुसरति श्रीखंडशैलानिलः किंचस्नि
ग्धरसालमौलिमुकुलान्यालोक्यहर्षोदया
दुन्मीलंति कुहूकुहूरिति कलोत्तालाः पिकानां गिरः १०॥

तुहिनमज्जनेच्छया अनुसरति अनुगच्छतीति किंच पत्रांतरे पिकानां गिरो वाण्यः स्निग्धरसाल
मौलिमुकुलानि आलोक्य दृष्ट्वा हर्षोदयादानंदोदयात् उन्मीलंति उच्छलंति कोकिलगिरः कुहूकु
हूरितिकलोत्तालाः कुहूकुहूरित्याकारेण अव्यक्तमधुरशब्देनोत्तालाः
प्रकट्यः कविः कथोपक्रमं तत्कालोचितानाविष्करोति ११॥ ॥ १२

रासोल्लासेति हरिः श्रीकृष्णः वो युष्मान्पातु रक्षतु कीदृशो हरिः रासोल्लासभरेण गोपक्रीडायां
हर्षातिशयेन विभ्रमभृतां शृंगारविलासधारिणीनां आभीरवामभ्रुवां गोपांगनानां अभ्यर्णे समी
पे निर्भरं गाढं यथास्यात्तथा वक्षः उरः स्थलं परिरभ्य आलिंग्य राधया अन्तर्दृष्टं प्रकटं यथास्यात्तथा गी

रासोल्लासभरेणविभ्रमभृतामाभीरवामभ्रुवामभ्यर्णेपरिरभ्य
निर्भरमुरः प्रेमांधया राधया साधुत्वद्वदनं सुधामयमिति व्या
हृत्य गीतस्तुतिव्याजादुत्कटचुंबितः स्मितमनोहारी हरिः पा
तुवः ११ इति श्रीगीतगोविंदे जयदेवकृते सामोददामोदरोना
मप्रथमः सर्गः १॥ ॥

स्तुतिव्याजात्प्रशंसाछलेन चुंबितः किं कृत्वा त्वद्वदनं तव मुखं सुधामयममृतमयं साधु शोभनं इति
व्याहृत्य उक्त्वा कीदृशो हरिः स्मितमनोहारी ईषद्धास्येन मनोहरः सुंदरो भक्तिशीलो
यस्य कोऽपि राधया प्रेमांधया ११॥ इति श्रीगीतगोविंदे जयदेवकृते सर्वांके सामोददामोदरो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी० राधारहः एकांते सखीमुवाच कीदृशाराधावनेवृंदावनेहरौहंसेविहरतिकीदृशेसति विग-
गो० लितनिजोत्कर्षात् गतनिजसौभाग्यात् ईर्ष्यावशेनासहिष्णुतयाअन्यतोमलिनस्यदेशगता १
टी०
१३

विहरति वने राधा साधारणप्रणये हरौ विगलितनिजोत्कर्षा
दीर्ष्यावशेन गतान्यतः क्वचिदपि लताकुंजे गुंजन्मधुव्रतमं-
डली मुखरशिखरे लीना दीनाप्युवाच रहः सखीं १॥ ॥

कीदृशे हरौ साधारणप्रणये अन्यासामपि तुल्यप्रेम्णि अतएव क्वचिदपि लताकुंजे तत्ताम् हेली-
नाम्रा कीदृशे लताकुंजे गुंजन्तीगंभीरंशब्दंकुर्वतीमधुव्रतानांभ्रमराणांमंडलीसमूहोयेन
स शिखरे यस्य आच्छाद्यमानाग्रभागे अतएवदीनापिदुःखितापि सखींकांचित्मध्येगीतेनाह १॥ १३

संचरदिति १ ध्रुवपदं हे सखि राधे वै प्राणेमममनः हरिं श्रीकृष्णं संस्मरति कीदृशो हरिं संचरताअधर-
सुधामधुरेणअधरामृतरसेनमनोहरेणध्वनिनाशब्देनमुखरितः शब्दितो मोहनना-
मावंशोयेन पुनःकीदृशं चलितश्चालितः दृगंचलः कटाक्षो यस्य चंचलः मौलिः शिखायस्य क-

गुर्जरीरागेण रासे हरिमिह विहितविलासं स्मरति मनो मम कृ-
तपरिहासं १ ध्रुवपदं संचरदधरसुधामधुरध्वनिमुखरितमो-
हनवंशं चलितदृगंचलचंचलमौलिकपोलविलोलवतंसं १

पोलेगंडस्थले विलोलः चंचलः अवतंसः कर्णाभरणं यस्य सः तं ततः ध्रुवपदं पुनःमेधार्
यः पुनः कीदृशं हरिं रासे गोपक्रीडायां विहितविलासे कृतक्रीडे पुनः कीदृशं कृतपरिहा
सं कृतः परिहासो येन तं ॥
१॥ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी॰ चंद्रकेण विचित्रवर्णचिह्नेन चारूणां शोभमानानां मयूरशिखंडकानां मयूरपिच्छानां मंडलेन समूहे
गो॰ न वलयिता वलयाकारेण वेष्टिताः केशा यस्य स तथा प्रचुरेण विस्तीर्णेन पुरंदरधनुषा अनुरंजितः
टी॰ चित्रितो मेदुरो निविडः स्निग्धः मुदिरः मेघस्तद्वत्सुवेशो सुंदरो १ गोपकदंबस्य गोपसमूह
१४

चंद्रकचारुमयूरशिखंडकमंडलवलयितकेशं प्रचुरपुरंदर
धनुरनुरंजितमेदुरमुदिरसुवेशं १ गोपकदंबनितंबवतीमु
खचुंबनलंभितलोभं बंधुजीवमधुराधरपल्लवमुल्लसितस्मि
तशोभम् २ ॥ ॥

स्य नितंबवतीनां स्त्रीणां मुखचुंबनेन लंभितः प्रापितः लोभो येन स पुनः कीदृशो बंधुजीवमिव १४
बंधुजीवपुष्पमिव मधुरो बहुलो अधरपल्लवः ओष्ठपल्लवो यस्य उल्लसितेन प्र
कटेन स्मितेन शोभा यस्य तं ३॥ ॥ राम ॥

विपुलाः बहुलाः पुलकाः रोमोद्गमाः ययोस्ताभ्यां भुजपल्लवाभ्यां वलयितं वेष्टितं बल्लवानामाभीरा
णां युवतिसहस्रं गोपिकासहस्रं येन पुनः कीदृशः करौ च चरणौ च उरश्च एतेषां समाहारः करचरणो
रस्तस्मिन् वर्तमानानां मणिगणयुक्तभूषणानां किरणैः विभिन्नं विदारितं तमिस्रमंधकारं

विपुलपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रं करचरणो
रसिमणिगणभूषणकिरणविभिन्नतमिस्रं ४ जलदपटलचलदिं
दुविनिंदकचंदनतिलकललाटं पीनपयोधरपरिसरमर्दन
निर्दयहृदयकपाटं ५ ॥ राम ॥

येन ४ पुनः कीदृशो जलदपटले मेघसमूहे चलन् संभ्रमन् इंदुश्चंद्रस्तं विनिंदके समाने चंदन
तिलकं चंदनकृततिलकं यत्र तादृशं ललाटं यस्य तं यद्वा उपमेयं पुनः कीदृशं पीनानां मांसलाना
मां पयोधराणां स्तनानां परिसरस्य पर्यंतदेशस्य मर्दने निर्दयं दयारहितं हृदयमेव कपाटं यस्य तं ५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी॰ गो॰ टी॰ १५

मणिमयेन मणिरूपेण मकरेण मनोहराभ्यां कुंडलाभ्यां मंडितो लेखितः गंडो गंडस्थलं यस्य तं पुनः कीदृशं उदारं महांतं अभीष्टदातारं वा पुनः कीदृशं पीतवसनं पीतांबरं अनुगता आश्रिता मुनयो यतयः मनुजा लोकाः सुरा देवा असुरा दैत्याः ते परिवाराः परिजना यस्य तं ६ विशदकदंब

मणिमयमकरमनोहरकुंडलमंडितगंडमुदारं पीतवसनम
नुगतमुनिमनुजसुरासुरवरपरिवारं ६ विशदकदंबतले
मिलितं कलिकलुषभयं शमयंतं मामपि किमपि तरंगदनं
गदृशा मनसा रमयंतं ७॥ ॥

तले विमलकदंबतले मिलितं उपस्थितं पुनः कीदृशं कलिकालजनितपापाद् भयं नाशयंतं पुनः
कीदृशं मामपि किमपि अनिर्वचनीयं यथा स्यात्तथा अनंगतरंगेण कंद १५
र्पयुक्तादृशा दृष्ट्या मनसा हृदयेन रमयंतं ७॥ ॥

श्रीजयदेवेन भणितं भक्तानां हरिचरणस्मरणं प्रति अनुरूपं योग्यं भवतु इत्याशयः कीदृशं अतिसुं
दरं मोहनं मोहकं मधुरिपुरूपं कृष्णरूपं यत्र इत्यष्टपदी गायता कृष्णेन वनवासेन तत्र कृष्णमाह ८
गणयतीति अहं मम मनः यमहारवेणुपानारोमांच केटविनमेगकमावरतो सहेरतेपपुत्रवतो
ऊलितालगलोमा मयकेविनाविरतितोभ्रमतः कंबोङः हेसखिममभांकिप्रवामिप्रयुनायोरूसे

श्रीजयदेवभणितमतिसुंदरमोहनमधुरिपुरूपं हरिचरणस्मरणंप्र
तिसंप्रतिपुण्यवतामनुरूपं ८ गणयतिगुणग्राममभ्राममभ्रमादपि।
नेहते वहतिचपरितोषंदोषंविमुंचतिदूरतः युवतिषुवलत्तृष्णेकृ
ष्णेविहारिणिमांविना पुनरपिमनोवामंकामंकरोतिकरोमिकिं

काममितिवोकरोमि किंकरोमि निश्चितोपायो नास्तीत्यर्थः युवतिषु गोपीषु वलत्तृष्णे जाताभिला
षे पुनः कीदृशे मां विना विहारिणि क्रीडाशीले कीदृशं मनः वाममेव मिथ्यैव वाम नेत्र कारणमा
मममनः सापराधस्यापि कृष्णस्य गुणसमूहं गणयति भ्रमादपि भ्रमं विभ्रमं नोनेहते नेच्छते या
दा भ्रामं कोपं वेहते मनो वहति तत्कृष्णकृतेन परितोषं संतोषं वहति दोषं अपराधं कृतं दूरे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मोऽविलंबनिपरित्यजति पुनः प्रियागामीतेन सखीमाह १ हे सखि केशिमथनं श्रीकृष्णं मया सह रम
य ध्रुवपदं निभृतेति कीदृशं कस्य कीदृशं उदारं महान्तं कीदृश्या मया मदनो मनोरथः इच्छा तेन
भावितया साभिप्रायया कीदृशं हासं सविकारं भावसहितं कीदृश्या मया निभृतं गुप्तं निकुंजगृ
हं लतामंडपं गतया प्राप्तया कीदृशं हसंतं निशि रात्रौ रहसि एकांतस्थले निलीय अंतर्धाय वसंतं

मालवरागे सखि हे केशिमथनमुदारं रमय मया सह मदनमनोरथ
भावितया सविकारं १ ध्रुवपदं निभृतनिकुंजगृहंगतया निशि
रहसि निलीय वसंतं चकितविलोकितसकलदिशा रतिरभसव
शेन हसंतं १ प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलं मृदु
मधुरस्मितभाषितया शिथिलीकृतजघनदुकूलं २

पुनः कीदृश्या मया चकितं सभ
यं यथा स्यात्तथा विलोकिता दृष्टाः सकला दिशो यया पुनः कीदृशं हसंतं केन रभसः उत्साहः तस्य भ
रेण पिकेन नरसंनेसस्मितमावे अलिनगीतेश्वर्धांशया विशेषणं अनुरागं श्रीकृष्णं निवे
धं १ प्रथमसमागमेन नवनं नवसानिधेन लज्जितया लज्जायुक्तया कीदृशं हसं वैलक्ष्यं दूरीकरणं १९

यत्पटूनि चाटुशतानि लक्ष्यशतानि तैरनुकूलमानुकूल्यकारकं मृदुकोमलं मधुरस्मितपूर्वकं भा
षितं यस्याः तया शिथिलीकृतं जघनदुकूलं नचनास्थितं परवस्त्रं येन तं २ किसलयशयनेन प
ल्लवकृतशय्यायां निवेशितया मम एव उरसि वक्षःस्थले चिरं चिरकालं शयानं कृतालिंगनमित्य

किसलयशयननिवेशितया चिरमुरसि ममैव शयानं कृतपरि
रंभणचुंबनया परिरभ्य कृताधरपानं ३ अलसनिमीलितलोच
नया पुलकावलिललितकपोलं श्रमजलसिक्तकलेवरया
वरमदनमदादतिलोलं ४ ॥ श्रीराम ॥

पुनः कृतं परिरंभणमालिंगनं चुंबनं यया परिरभ्य आलिंग्य कृतमधरपानमोष्ठपानं येन ३ अलसेन त
रलतापेन निमीलिते मुद्रिते लोचने यया पुलकावल्या रोमांचपंक्त्या ललितौ मनोहरौ क
पोलौ यस्य तं श्रमजलेन स्वरतजनितवारिणा सिक्तं कलेवरं यस्याः तया वरमदनमदात् उत्तम

Dr. Urmila Sharma Collection, Varanasi

गी॰ गो॰ टी॰ ९

कामजनितहर्षोद्गतिलोसमतिचेवलमित्यर्थः ४ कोकिलानांकलरवोऽव्यक्तमधुरध्वनिवत्कूजितं
शब्दोयस्यास्तया जितोमनसिजतंत्रविचारः कामशास्त्रसिद्धांतोयेनतं श्लथाःशिथिलाःकुसु-
माकुलाःकुंतलाःकेशायस्यास्तया नखेनलिखितःचिह्नितोघनोनिबिडःस्तनभारोयेनतं ५॥

कोकिलकलरवकूजितयाजितमनसिजतंत्रविचारं श्लथकु
सुमाकुलकुंतलया नखलिखितघनस्तनभारं ५ चरणर
णितमणिनूपुरयापरिपूरितसुरतवितानं मुखरविश्रृंखल
मेखलयासकचग्रहचुंबनदानं ६॥ राधाकृष्ण॥

चरणयोःरणितौशब्दितौमणिजटितनूपुरौयस्यास्तया परिपूरितंसंपूर्णीकृतंसुरतवितानंसु-
रतसमूहोयेनतं मुखरशब्दायमानाविश्रृंखलाःमेखलाकांचीयस्यास्तया सकच- ९
ग्रहंकेशाग्रहणसहितंचुंबनदानंयस्मिंस्तं ६ रतिसुखकालेमीलनाअलसयाआलस्ययुक्तया

दरमुकुलितनयनसरोजंईषन्मीलितनेत्रकमलेनिःसहाअसमर्थानिपतितातनुलतायस्यास्त-
या मधुसूदनमुदितमनोजं उदितमनोजंजातकामं ७ इदंश्रीजयदेवकविनाउक्तंगीतंकृष्णपारिसेलो-
किकेभ्यःसुखंनिश्चयेनविस्तारयतु कीदृशंजयदेवभणितंअतिशयमधिकंमधु-

रतिसुखसमयरसालसयादरमुकुलितनयनसरोजं निःसह-
निपतिततनुलतयामधुसूदनमुदितमनोजं ७ श्रीजयदेव
भणितमतिशयमधुरिपुनिधुवनशीलं सुखमुत्कंठितगो
पवधूकथितंवितनोतुसलीलं ८॥ राम॥

वदितं
मधुरिपुनिधुवनशीलेक्रीडासुरतंयस्मिन् पुनःकीदृशंउत्कंठितयागोपवध्वाराधयाकथितं पुनः
कीदृशं सलीलंशृंगारक्रियासहितं ८॥ हेसखिविष्णुविरहक्लेशंपश्यामिदर्शनेनकृत्याःमिहंराधे-
प्राप्नोमि कीदृशंगोविंदंकाननेवृंदावनेव्रजसुंदरीभिर्गोपीसमूहेनवेष्टितंपुनःकीदृशमामाउ

CC0. In Public Domain, Digitizagtion by eGangotri

गी० गो० टी० १८

दीसा दृष्टा हल्ला न स्वलो विगलितः विलासवंशः कीदृशं वंशोपयसं तं पुनः कीदृशो अनङ्गभ्रूवलि
मतीनां कुटिलभ्रूलताप्रवृत्तानां वल्लवीनां गोपीनां वृन्दे समूहे अन्तरे ऊर्ध्वं तिर्यग्गामि दृग्गतवी।

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवीवृन्दोत्सारिदृगन्त
वीक्षितमतिस्वेदार्द्रगण्डस्थलं मामुद्वीक्ष्य विलज्जितं स्मित
सुधामुग्धाननं काननेगोविन्दं व्रजसुन्दरीपरिवृतं पश्यामि
हृष्यामि च १॥ राम॥

क्षितं कटाक्षेण वीक्षितं यस्य तं पुनः कीदृशं अतिस्वेदेनातिघर्मेणार्द्रं गण्डस्थलं यस्य तं विलज्जितं स्मितं लज्जया १८
सुन्दरे वस्त्रधाः स्मितं तया मुग्धं सुन्दरं आननं मुखकमलं यस्य तं १॥ श्रीकृष्णायनमः॥॥

देवा विदुरालोकः दुःखेनालोक्यते वियोगिनामद्वेगजनितत्वात् दुरालोकः स्तोकोल्पः स्तबको
गुच्छो यस्य नवाशोकस्य नवीनशोकस्य लतिकायाः विकासः उद्योतो मां व्यथयति पीडयति किं।
च कासारोपवनपवनोपि सरोवरनिकरवनवायुरपि मां व्यथयति अपि च नूतनानां आम्राणां च

दुरालोकस्तोकस्तबकनवकाशोकलतिकाविकासः कासारो
पवनपवनोपि व्यथयति अपि भ्राम्यद्भृङ्गीरणितरमणीया।
न मुकुलप्रसूतिर्नूतनानां सखि शिखरिणीयं व्यथयति २॥

येन मुकुलप्रसूतिः कलिकोद्भवः मां व्यथयति कीदृशा आम्रमञ्जरीणां च लेलीनां भ्रमरीणां रणितैः
शब्दितैः रमणीया मनोज्ञा यस्याः शिखरिणी शाखाग्रभागवती शिखरिणीनामापिच्छन्द
इदं अधुना कविः लोकानां शिक्षयति साधुश्लोकेति २॥ नवः सम्प्रयोगः नरूपेण केशवः वायु
ना कंभक्तानां क्लेशं दुःखं हरन् हरीकरोति कीदृशः केशवः गोपीनां निभृतं गोप्यभावे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी॰ गो॰ टी॰ १५

निरीक्ष्य स्थाकांक्षितं चिरं यथा स्यात्तथा अंतर्मनसि चिंतयन् पुनः कीदृशः मुग्धमनोहरो मोहयुक्तः सुंदरः कीदृशं निभृतं साकूतं साभिप्रायं स्मितमीषद्धास्यं यत्र आकुलाकुलः अत्यंतव्याकुलः गलन् धम्मिल्लो भवन् धम्मिल्लः केशपाशो यत्र उल्लासिता उत्थिता भ्रूवल्ली भ्रूलता यत्र अलीकेन छलेन दर्शितं भुजामूलावहृ।

साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासित भ्रूवल्लीकम
लीकदर्शितभुजामूलार्धदृष्टस्तनं गोपीनां निभृतं निरीक्ष्य
गमिताकांक्षश्चिरं चिंतयन्नंतर्मुग्धमनोहरो हरतु वः क्लेशं नवः केशवः
२ ॥ इति श्रीगीतगोविंदे जयदेवकृते अक्लेशकेशवो नाम द्वितीयः २
कंसारिरपि संसारवासनाबद्धशृंखलां राधामाधाय हृदये तत्याज व्र

स्तलनायत्र भुजामूलावहृत्स्तनयोर्निर्देशः २ इति श्रीगीतगोविंदटीकायां जयदेवकृते अक्लेशकेशवो नाम द्वितीयः सर्गः २॥ इदानीं विरहव्यथामाह कंसारिरिति कंसारिरपि श्रीकृष्णोपि राधां हृदये मनसा आधाय संस्थाप्य व्रजसुंदरी गोपीस्तत्याज त्यक्तवान् कीदृशीं संसारे वासना १५

समाधवः यमुनाकूले लतागृहे निषसाद स्थितवान् किं कृत्वा इतस्ततोऽनेकस्थानेषु तां राधामनुसृत्यान्विष्य कीदृशः कामबाणक्षतेन खिन्नं दीनं मानसं मनो यस्य कृतानुतापः कृतपश्चात्तापः कृतानुतापत्वमेवाह गीतेन २ मामियमिति ध्रुवपदं हरिहरीति खेदानुकंपा राधा हृता आदरतया हृतबहुमानत्वेन कु

इतस्ततस्तामनुसृत्य राधिकामनंगबाणव्रणखिन्नमानसः कृता
नुतापः स कलिंदनंदिनीतटांतकुंजे निषसाद माधवः १ गुर्जरीरागः
हरिहरि हतादरतया गता सा कुपितेव ध्रुवपदं मामियं चलिता वि
लोक्य वृतं वधूनिचयेन सापराधतया मयापि न वारितातिभयेन १
किं करिष्यति किं वदिष्यति सा चिरं विरहेण किं धनेन जनेन किं मम

पितेव कोपं प्राप्तेव गता अन्यस्थाने गता किं कृत्वा मां कृष्णं वधूनिचयेन गोपीसमूहेन वृतं वेष्टितं विलोक्य गता मामवलोक्य चलिता इति भिन्नवाक्यरचना मयापि कृष्णेनापि सापराधतया सापराधत्वेन हेतुना अतिभयेन न वारिता यद्वा कीदृशो मया अतिशयितं भयं युक्तमिति तेन १ सा राधा चिरं विरहेण चिरकालवियोगेन किं करिष्यति किं वदिष्यति तां राधां विना सर्वं विफलमित्यर्थः २॥ गोपालाय नमः॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अहंराधामुखंचिंतयामिस्मरामि कीदृशं तदाननंकोपातिशयेनकुटिलेवक्रेभ्रुवौयत्र किमिवरक्तोत्पलमि
गी॰ वकीदृशंशोणपद्मम्परिभ्रमताभ्रमेणाकुलं ३ अहंहृदिसंगतांराधामनिशंवारंवारंभृशमतिशयेनरम
गो॰ यामिक्रीडयामि इहवनेतांराधांकिमनुसरामिहृदिसंगतत्वादेवहृथाव्यर्थमेवकिंविलपामि हृदिसंगतां
टी॰
२॰

चिंतयामितदाननंकुटिलभ्रुकोपभरेण शोणपद्ममिवोपरिभ्र
मताकुलंभ्रमरेण ३ तामहंहृदिसंगतामनिशंभृशंरमयामि
किंवनेऽनुसरामितामिहकिंवृथाविलपामि ४ तन्विखिन्न
मसूययाहृदयंतवाकलयामि तन्नवेद्मिकुतोगतासिनतेनतेनुन

तांमत्वाह ४ हेतन्विअसूयया:सहिष्णुत्वेनखिन्नंदुःखितंतवहृदयंआकलयामि तत्तस्मादहंनवेद्मि
नजानेकुतः कुत्रगतासि तेनकारणेनतेत्वांनानुनयामि नप्रसादयामि ते
इतिश्रीत्यासंप्रदानत्वं ५ ॥ राम ॥ २॰

देराधेत्वंममपुरतोग्रेगतागतंगमनागमनमेवत्वंविदधासि करोषीतिदृश्यसे नतुपुरेवपूर्ववत् ससंभ्र
मेससवेगंपरिरंभणमालिंगनंकिंकेनहेतुनानददासि ६ हेसुंदरिपूर्वकृतमपराधःक्षम्यतां अपरमीदृ
शंतवापराधंकदापिअहंनकरोमि अतएवममदर्शनंदेहि यतोहंमन्मथेनकामेनदुनोमिपीडामनु

दृश्यसेपुरतोगतागतमेवमेविदधासि किंपुरेवससंभ्रमंपरिरंभणं
नददासि ६ क्षम्यतामपरंकदापितवेदृशंनकरोमि देहिसुंदरिद
र्शनंममममन्मथेनदुनोमि ७ वर्णितंजयदेवकेनहरेरिदंप्रवणेन
केंदुविल्वसमुद्रसंभवरोहिणीरमणेन ८ भ्रूपल्लवंधनुरपांगतरंग
तानिबाणागुणाःश्रवणपालिरितिस्मरेण तस्यामनंगजयजंगम

भवामि ७ जयदेवकेनहरेरिदंगीतंवर्णितं कीदृशेनहरेःप्रवणेनहरेरायत्तेन पुनःकीदृशेनकेंदुविल्वेज
यदेवकुलंतदेवसमुद्रः तस्मात्संभवोयस्य एतादृशोरोहिणीरमणःचंद्रइव यथासागरादुत्पन्नश्चंद्रःजग
तांकेंदुविल्वोत्पन्नोजयदेवइति ८ इतिपूर्वोक्तप्रकारेणस्मरेणकामेनतस्याराधायामस्त्राणिकिमर्पितानि ८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कीदृशं तस्याः अनंगस्य कंदर्पस्य जयः त्रैलोक्यविजयं जंगमदेवतायां गमनशीलदेवतारूपायां कीदृशान्य
स्त्राणि निर्जितजगंति जितत्रैलोक्यानि इति किं भूपल्लवेभूलतापत्रः अपांगतरंगिताः निकटान्तनिर्गत
बाणाः निबाणाः श्रवणपालिः कर्णप्रदेशः गुणाः पतंचः ॥ हे अनंग मम पिहरभ्रान्त्या महादेवभ्रमेणानुगृह

देवतायाम स्त्राणि निर्जितजगंति किमर्पितानि ॥ हृदि विशाल
ताहारो नायं भुजंगमनायकः कुवलयदलश्रेणी कंठेन सा गर
लद्युतिः मलयजरजो नेदं भस्म प्रियारहिते मयि प्रहर न हरभ्रां
त्यानंग क्रुधा किमु धावसि १० ॥

रनप्रहारं कुरु क्रुधा कोपेन किमुकिमितिधावसि मारयितुं धावनं करोषि हरभ्रांतिं परिहरति हे का
म मम हृदि विशालता हारो मृणाललताहारो वर्तते नायं भुजंगनायकः शेषः मम कंठे नीलोत्पलद
लपंक्तिर्वर्तते न सा गरलद्युतिः हलाहलदीप्तिः इदं मलयजरजो वर्तते भस्म नास्ति मयि प्रियारहिते राधा

हे क्रीडानिर्जितविश्वसंसार काम अमुं चूतसायकं आम्रपुष्पबाणं पाणौ हस्ते मा कुरु चापं धनुः
मा आरोपय सज्यं मा कुरु अस्माकं यतो मूर्च्छितजनाघातेन मूर्च्छितजनपीड्या किं ते पौरुषं कस्तव पु
रुषार्थः मूर्च्छितत्वे कारणमाह तस्या एव राधाया मृगीदृशो हरिणीनयनायाः मनसिजेन कामेन

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय क्रीडानि
र्जितविश्वमूर्च्छितजनाघातेन किं पौरुषं तस्या एव मृ
गीदृशो मनसिजप्रेंखत्कटाक्षानल ज्वालाजर्जरितं मना
गपि मनो नाद्यापि संधुक्षते ११ ॥ राम ॥

प्रेंखतां चलतां कटाक्षानलानां कटाक्षवह्नीनां ज्वालया पंक्त्या जर्जरितं जर्जरीकृतं खंडखंडीभूतं मे मनः
मनागपि स्वल्पमपि नाद्यापि संधुक्षते अंकुरितं भवति क्वचित्कटाक्षशरानलेति पाठः तदा कटाक्षाप
बाणमार्गणाः अधुना मनो विषयीकृत्य राधां प्रति सोत्कंठः सन्नाह ११ ॥ गोपालाय नमः ॥ ॥

Dr. Urmila Sharma Collection, Varanasi

गी० भ्रूचापइति हे तन्वि इत्यामि भ्रूचापे भ्रूवावेवचापं धनुस्तत्रनिहितोऽर्पितः कटाक्षएवविशिखः बाणःमर्म
गो० व्यथांममर्मपीडांनावतनिर्मातनकरोति विशिखस्यमर्मव्यथाजनकत्वंयुक्तमेवेतिभावः अथचश्यामाल्मा
टी० श्यामवर्णः कुटिलोवक्राकारः कवरीभारोपिकेशसमूहोपिमारोपमेकामीत्रयंनावत्करोति मलि
२२

भ्रूचापेनिहितःकटाक्षविशिखोनिर्मातुमर्मव्यथां श्यामा-
त्माकुटिलःकरोतुकवरीभारोपिमारोद्यमं मोहंता-
वदयंचतन्वितनुतांविंबाधरोरागवान् सद्वृत्तःस्तनमं-
डलस्तवकथंप्राणैर्ममक्रीडति १२ ॥ राधाहंसायते०

न्यक्कुटिलस्यचमारोद्यमंयुक्तमेव अयंचविंबाधरःविंबोष्ठःमोहंतनुतांविस्तारयतांकीदृ-
शोविंबाधरःरागवांल्लोहितवर्णः रागिणोविषयिणःमोहोममत्वंयुक्तमेव सद्वृत्तःसाधुवर्तुलः २२
स्तनमंडलःममप्राणैःकथंक्रीडति सद्वृत्तास्तुपरप्राणैश्चानकाननभवंतीति १२॥ राम॥

तान्येवस्पर्शास्वादानियानिपुराणानियिकाभोगमेनमनुभूतानि तेचतरलाःचंचलाःस्निग्धाःप्रेमान्विताःदृ-
शःचक्षुषोविभ्रमाविलासाःएतेनरूपंवक्त्रांबुजसौरभं मुखकमलसौगंध्यमनेनगंधः साचविं-
बाधरमाधुरीविंबोष्ठरसस्यमाधुर्यमेतेनरसः इतिविषयासंगेपिरूपरसस्पर्शादीनांसन्निधेपिमम.

तानिस्पर्शसुखानितेचतरलाःस्निग्धादृशोविभ्रमास्
तद्वक्त्रांबुजसौरभंसचसुधास्यंदीगिरांविभ्रमः साविं
बाधरमाधुरीतिविषयासंगेपिचेन्मानसं तस्यांलग्नं-
समाधिहंतविरहव्याधिःकथंवर्तते १३॥ राम०

मानसंमनःतस्यांराधायांलग्नंसमाधिप्राप्तमस्थानेवर्तते नयहेतोखेदेविरहव्याधिःकथंवर्तते ध्या-
नयुक्तस्ययोगिनोव्याधिनाशात् अधुनाकविर्भक्तान्प्रत्याशीर्वादंयच्छति १३ मधुसूदनस्यश्रीकृ-
ष्णस्यकटाक्षरूपाअनंततरंगाःवोयुष्माकंभक्तानांतेमेकल्याणंचिरंदद्यात् श्रयच्छेतु कीदृशाः मधुरे

CC0. In Public Domain, Digitizagtion by eGangotri

संदेशायामवेंदौराधामुखचंद्रे संमुग्धं मधुसूदनस्य मुरसंदंचतो किंचित्तनवयषाद्यकथाकंदलिताः पल्लवि
ताः पुनः कीदृशाः वंशाद्उच्चरत्त वेणोर्निर्गच्छन्ती गीतिस्थानेषु ज्ञानपदेषु कृतावधानैः दत्तमनोभिर्ललना
लक्षैः गोपांगनासहस्रैः नसंलक्षिताः नज्ञाताइत्यर्थः कीदृशस्य मधुसूदनस्य तिर्यग्वक्रः कंठोयस्यावि-

तिर्यक्कंठविलोलमौलितरलोत्तंसस्य वंशोच्चलद्गीतिस्थानकृताव
धानललनालक्षैर्नसंलक्षिताः संमुग्धं मधुसूदनस्य मधुरे राधामु
खेंदौम्रदुस्पंदंकंदलिताश्चिरं दधतु वः क्षेमं कटाक्षोर्मयः १४ इति श्रीगी
तगोविंदे मुग्धमधुसूदनो नाम तृतीयः सर्गः ३ ॥ यमुनातीरवानीरनि
कुंजे मंदमास्थितं प्राह प्रेमभरोद्भ्रांतं माधवं राधिकासखी १ ॥ ॥

लोलः चंचलो मौलिर्यस्य मौलिः किरीटो वा यस्य तरलः चंचलः उत्तंसोवतंसो यस्य सः पश्चात्कर्मधारयः लक्षप
दं बहुत्वोपलक्षकं यथोक्तौ विदग्धो त्यर्थः १४ इति श्रीगीतगोविंदे सटीके मुग्धमधुसूदनो नाम तृतीयः ३ २३
श्रीराधायाः सखी श्रीकृष्णं प्राह यमुनेति राधिकासखी श्रीकृष्णं प्राह वक्ष्यमाणप्रकारेण कीदृशं मा

यमुनातीरे यो वानीरनिकुंजो वेतसोपलक्षितस्तदंतः स्थितं मंदं मंदमास्थितं स्थितं पुनः कीदृशं माधवं
प्रेमभरेण राधायां प्रेमातिशयेन उद्भ्रांतं संदिग्धचित्तं, उक्तश्लोकं गीतेनाह निंदतीति अस्य कर्णाटरागः
रागलक्षणं कृपाणपाणिर्गजदंतपत्रमेकं वहन् दक्षिणकर्णपूरे संस्तूयमानः सुरचारणौघैः कर्णाट
रागः शितिकंठवर्णः सखी वर्णितविरहोत्कंठितावर्णनीया वासकशय्यासोत्कंठा न पाष्यापीन भर्त्रे
का कलहांतरिताचापि विप्रलब्धाभिसारिका प्रोषिता प्रोषितभर्तृका चेति नायिकाष्टकं प्रकाशिताः १ तत्रोक्ते

निंदति चंदनमिंदुकिरणमनुविंदति खेदमधीरं व्यालनिलयमिलनेन
गरलमिव कलयति मलयसमीरं १ सा विरहे तव दीना माधव मनसि
जविशिखभयादिव भावनया त्वयि लीना १ ॥ ध्रुवपदं ॥

चालक्षण भरतोक्तं यस्याः समधिकोत्पद्यिप्रवासी नैति वल्लभः सा समानंतलक्षेनु माविरहोत्कंठिता मता १
अत्र पदे हे माधव कृष्ण सा राधा तव विरहे सति दीना दुःखिता त्वामपि भावनया ध्यानेनैव कामबाणः कुसु
मस्तेषां भयादिव त्वयि लीना प्रविष्टा कस्मादिव कामबाणभयादिव के नप्रका
रेणान्याह हे कृष्ण सा राधा चंदनं निंदति इंदुकिरणं चेदृशी भिमनलली कृत्या धीरमनसं पीडे देति निंदति लभते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयसमीरं मलयवातं व्यालनिलयं सर्पस्थानं चंदनं हूतवत्तस्य मित्तेनेन स्पर्शेनेन गरलं विषमिव कलय निमन्यते १ हे कृष्ण सा राधा स्वहृदयमर्मणि स जलकमलिनीपत्रसमूहमेव वर्म तनुत्रं करोति कस्मै भवदवनाय भवतो रक्षणाय स्वहृदयस्थितस्य भवतो रक्षणाय कस्मादिव अविरलं निरंतरं नियतितो मद

अविरलनिपतितमदनशरादिव भवदवनाय विशालं स्वहृदयम
र्मणि वर्म करोति सजलनलिनीदलजालं २ कुसुमविशिखश
रतल्पमनल्पविलासकलाकमनीयं व्रतमिव तव परिरंभसु
खाय करोति कुसुमशयनीयम् ३॥ राम॥

नशरः कामबाणः तस्मादिव कीदृशं वर्म विशालं विस्तीर्णं तस्या हृदये तिष्ठसीति भावः २ कुसु
मशय्याभावे पुष्पशरशय्यामेव करोतीत्यन्वयः किमिव कुसुमविशिखमिव तादृशं व्रतमिव श
रशय्याचरणरूपं यत्कृष्णव्रतमिति भावः किमर्थं व्रतमित्याह तव परिरंभसुखाय तवालिंगनसुखाय

सा राधा उदारं मनोज्ञमाननकमलं वहति धारयति कीदृशं वलितमश्रुमिश्रितं यद्विलोचनजलं तेनाश्रुजलधा
रयतीति किमिव विधुमिव कीदृशं विधुं विकटेन दारुणेन विधुंतुदस्य राहोर्दंतेन दलनात् गलिताः
मृतधारा यस्मात् ४ हे कृष्ण सा राधा असमशरभूतं कंदर्परूपं भवंतं त्वां रहसि एकांते कुरंगमदेन क
स्तूरिकया विलिखति अधः कामरूपस्य भवतोऽधस्तात् मकरं कामवाहनं विनिधाय कृत्वा करे हस्ते

वहति च वलितविलोचनजलधरमाननकमलमुदारं विधुमिव वि
कटविधुंतुददंतदलनगलितामृतधारं ४ विलिखति रहसि कुरंग
मदेन भवंतमसमशरभूतं प्रणमति मकरमधो विनिधाय करे च श
रं नवचूतं ५ प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहं
त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहं ६

नवचूतेन नवाम्रपुष्पेण शरं बाणं विनिधाय संस्थाप्य प्रणमति प्रणामं करोति अनुलेपनं स्मरस्य
प्रज्ञेयमिति यावत् तदनंतरं च ५ हे कृष्ण सा राधा प्रतिपदं प्रतिक्षणं इदमपि निगदति वदति हे माध
व हे माधव तव चरणे अहं पतिता किमित्यत आह त्वयि विमुखे पराङ्मुखे सति मयि सपदि तत्क्षणं सु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गी॰ गो॰ टी॰ २५

